# || श्री स्वामी सामर्थ ||

---

### || ६४ योगिनी नाम स्तोत्र ||

---

।श्री गणेशाय नमः।
। श्री स्वामी सामर्थाय नमः ।

गजानना सिंहमुखी गृध्रास्या काकतुंडिका।।
उष्ट्रग्रीवा हयग्रीवा वाराही शरभानना ।।१।।

उलूकिका शिवारावा मयूरी विकटानना ।।
अष्टवक्त्रा कोटराक्षी कुब्जा विकटलोचना ।।२।।

शुष्कोदरी ललज्जिह्वा श्वदंष्ट्रा वानरानना ।।
ऋक्षाक्षी केकराक्षी च बृहत्तुंडा सुराप्रिया ।। ३ ।।

कपालहस्ता रक्ताक्षी शुकी श्येनी कपोतिका ।।
पाशहस्ता दंडहस्ता प्रचंडा चंडविक्रमा ।। ४ ।।

शिशुघ्नी पापहंत्री च काली रुधिरपायिनी ।।
वसाधया गर्भभक्षा शवहस्तांत्रमालिनी ।।५।।

स्थूलकेशी बृहत्कुक्षिः सर्पास्या प्रेतवाहना ।।
दंदशूककरा क्रौंची मृगशीर्षा वृषानना ।। ६ ।।

व्यात्तास्या धूमनिःश्वासा व्योमैकचरणोर्ध्वदृक् ।।
तापनी शोषणीदृष्टिः कोटरी स्थूलनासिका ।।

विद्युत्प्रभा बलाकास्या मार्जारी कटपूतना ।।

अट्टाट्टहासा कामाक्षी मृगाक्षी मृगलोचना ॥७॥

नामानीमानि यो मर्त्यश्चतुःषष्टिं दिनेदिने ॥
जपेत्रिसंध्यं तस्येह दुष्टबाधा प्रशाम्यति ॥ ८ ॥

न डाकिन्यो न शाकिन्यो न कूष्मांडा न राक्षसाः ॥
तस्य पीडां प्रकुर्वंति नामानीमानि यः पठेत् ॥ ९ ॥

शिशूनां शांतिकारीणि गर्भशांतिकराणि च ॥
रणे राजकुले वापि विवादे जयदान्यपि ॥ १० ॥

लभेदभीप्सितां सिद्धिं योगिनीपीठसेवकः ॥
मंत्रांतराण्यपि जपंस्तत्पीठे सिद्धिभाग्भवेत् ॥ ११ ॥

बलिपूजोपहारैश्च धूपदीपसमर्पणैः ॥
क्षिप्रं प्रसन्ना योगिन्यः प्रयच्छेयुर्मनोरथान् ॥ १२ ॥

शरत्काले महापूजां तत्र कृत्वा विधानतः ॥
हवींषि हुत्वा मंत्रज्ञो महतीं सिद्धिमाप्नुयात् ॥ ४७ ॥

आरभ्याश्वयुजःशुक्लां तिथिं प्रतिपदं शुभाम् ॥
पूजयेन्नवमीयावन्नरश्चिंतितमाप्नुयात् ॥ १३ ॥

कृष्णपक्षस्य भूतायामुपवासी नरोत्तमः ॥
तत्र जागरणं कृत्वा महतीं सिद्धिमाप्नुयात् ॥ १४ ॥

प्रणवादिचतुर्थ्यन्तैर्नामभिर्भक्तिमान्नरः ॥
प्रत्येकं हवनं कृत्वा शतमष्टोत्तरं निशि ॥
ससर्पिषा गुग्गुलुना लघुकोलि प्रमाणतः ॥
यां यां सिद्धिमभीप्सेत तांतां प्राप्नोति मानवः ॥१५॥

चैत्रकृष्णप्रतिपदि तत्र यात्रा प्रयत्नतः ॥
क्षेत्रविघ्नशांत्यर्थं कर्तव्या पुण्यकृज्जनैः ॥ १६ ॥

यात्रा च सांवत्सरिकीं यो न कुर्यादवज्ञया ॥
तस्य विघ्नं प्रयच्छंति योगिन्यः काशिवासिनः ॥ १७ ॥

अग्रे कृत्वा स्थिताः सर्वास्ताः काश्यां मणिकर्णिकाम् ॥
तन्नमस्कारमात्रेण नरो विघ्नैर्न बाध्यते ॥ १८ ॥

इति श्रीस्कांदे महापुराण एकाशीति साहस्र्यां संहितायां चतुर्थे काशीखंडे पूर्वार्द्धे षष्टियोगन्यागमनंनाम पंचचत्वारिंशोध्यायः ॥ १९ ॥

॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥

|| श्री स्वामी समर्थापर्ण मस्तु||